# વેદસાર શિવસ્તવ સ્તોત્રમ
# (છંકરાચાર્ય વિરચિતો)

## Vedasaara Shivastava Stotram
## (Shankaraachaarya Virachito)

---

વેદસાર શિવસ્તવ સ્તોત્રમ |
(છંકરાચાર્ય વિરચિતો)

પશૂનાં પતિં પાપનાશં પરેશં ગજેન્દ્રસ્ય કૃત્તિં વસાનં વરેણ્યમ |
જટાજૂટમધ્યે સ્ફુરદ્ગાઙ્ગવારિં મહાદેવમેકં સ્મરામિ સ્મરારિમ ||૧||

મહેશં સુરેશં સુરારાતિનાશં વિભું વિશ્વનાથં વિભૂત્યઙ્ગભૂષમ |
વિરૂપાક્ષમિન્દ્વર્કવહ્નિં ત્રિનેત્રં સદાનન્દમીડે પ્રભું પઞ્ચવક્ત્રમ ||૨||

ગિરીશં ગણેશં ગલે નીલવર્ણં ગવેન્દ્રાધિરૂઢં ગુણાતીતરૂપમ |
ભવં ભાસ્વરં ભસ્મના ભૂષિતાઙ્ગં ભવાનીકળત્રં ભજે પઞ્ચવક્ત્રમ ||૩||

શિવાકાન્ત શંભો શશાઙ્કાર્ધમૌલે મહેશાન શૂલિન જટાજૂટધારિન |
ત્વમેકો જગદ્વ્યાપકો વિશ્વરૂપ પ્રસીદ પ્રસીદ પ્રભો પૂર્ણરૂપ ||૪||

પરાત્માનમેકં જગદ્બીજમાદ્યં નિરીહં નિરાકારમોઙ્કારવેદ્યમ |
યતો જાયતે પાલ્યતે યેન વિશ્વં તમીશં ભજે લીયતે યત્ર વિશ્વમ ||૫||

ન ભૂમિર્ન ચાપો ન વહ્નિર્ન વાયુર્ન ચાકાશમાસ્તે ન તન્દ્રા ન નિદ્રા |
ન ગ્રીષ્મો ન શીતં ન દેશો ન વેષો ન યસ્યાસ્તિ મૂર્તિસ્ત્રિમૂર્તિં તમીડે ||૬||

અજં શાશ્વતં કારણં કારણાનાં શિવં કેવલં ભાસકં ભાસકાનામ |
તુરીયં તમઃ પારમાદ્યન્તહીનં પ્રપદ્યે પરં પાવનં દ્વૈતહીનમ ||૭||

નમસ્તે નમસ્તે વિભો વિશ્વમૂર્તે નમસ્તે નમસ્તે ચિદાનન્દમૂર્તે !
નમસ્તે નમસ્તે તપોયોગગમ્ય નમસ્તે નમસ્તે શ્રુતિજ્ઞાનગમ્ય ||૮||

પ્રભો શૂલપાણે વિભો વિશ્વનાથ મહાદેવ શંભો મહેશ ત્રિનેત્ર |
શિવાકાન્ત શાન્ત સ્મરારે પુરારે ત્વદન્યો વરેણ્યો ન માન્યો ન ગણ્યઃ ||૯||

શંભો મહેશ કરુણામય શૂલપાણે ગૌરીપતે પશુપતે પશુપાશનાશિન |
કાશીપતે કરુણયા જગદેતદેકસ્ત્વં હંસિ પાસિ વિદધાસિ મહેશ્વરોઽસિ ||૧૦||

ત્વત્તો જગદ્ભવતિ દેવ ભવ સ્મરારે ત્વય્યેવ તિષ્ઠતિ જગન્મૃડ વિશ્વનાથ |
ત્વય્યેવ ગચ્છતિ લયં જગદેતદીશ લિઙ્ગાત્મકં હર ચરાચરવિશ્વરૂપિન ||૧૧||

ઇતિ શ્રીમચ્છંકરાચાર્યવિરચિતો વેદસારશિવસ્તવઃ સંપૂર્ણઃ ||

**www.shaivam.org**